topic 26

Date
Page

# गति समास — 2

अस्तं च। अस्तमिति मान्तमव्ययं गतिसंज्ञं स्यात्। अस्तंगत्य। अच्छ गत्यर्थवदेषु। अव्ययम् इत्येव। अच्छगत्य। अच्छोद्य अभिमुखं गत्वा, उक्त्वा चेत्यर्थः। अव्ययं किम् - जलमच्छं गच्छति। अदोऽनुपदेशे अदःकृत्य अदःकृतम्। परं प्रत्युपदेशे। प्रत्युदाहरणम् - अदः कृत्वा अदः कुरु।
तिरोऽन्तर्धौ। तिरोभूय। विभाषा कृञि। तिरस्कृत्य, तिरःकृत्य, तिरः कृत्वा।
उपाजेऽन्वाजे। एतौ कृञि वा गतिसंज्ञौ स्तः। उपाजेकृत्य, उपाजे कृत्वा। अन्वाजेकृत्य, अन्वाजे कृत्वा। दुर्बलस्य बलमाधायेत्यर्थः।